श्री कामाक्षी स्तोत्रं (ब्रह्म कृतं)

श्री कामाक्षी स्तोत्रं (ब्रह्म कृतं)

ब्रह्मोवाच |
जय देवि जगन्मातर्जय त्रिपुरसुंदरि |
जय श्रीनाथसहजे जय श्रीसर्वमंगले || 1 ||

जय श्रीकरुणाराशे जय शृंगारनायिके |
जयजयेधिकसिद्धेशि जय योगींद्रवंदिते || 2 ||

जय जय जगदंब नित्यरूपे
जय जय सन्नुतलोकसौख्यदात्रि |
जय जय हिमशैलकीर्तनीये
जय जय शंकरकामवामनेत्रि || 3 ||

जगज्जन्मस्थितिध्वंसपिधानानुग्रहान्मुहुः |
या करोति स्वसंकल्पात्तस्यै देव्यै नमो नमः || 4 ||

वर्णाश्रमाणां सांकर्यकारिणः पापिनो जनान् |
निहंत्याद्यातितीक्ष्णास्त्रैस्तस्यै देव्यै नमो नमः || 5 ||

नागमैश्च न वेदैश्च न शास्त्रैर्न च योगिभिः |
वेद्या या च स्वसंवेद्या तस्यै देव्यै नमो नमः || 6 ||

रहस्याम्नायवेदांतैस्तत्त्वविद्भिर्मुनीश्वरैः |
परं ब्रह्मेति या ख्याता तस्यै देव्यै नमो नमः || 7 ||

हृदयस्थापि सर्वेषां या न केनापि दृश्यते |
सूक्ष्मविज्ञानरूपायै तस्यै देव्यै नमो नमः || 8 ||

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः |
यद्ध्यानैकपरा नित्यं तस्यै देव्यै नमो नमः || 9 ||

यच्चरणभक्ता इंद्राद्या यदाज्ञामेव बिभ्रति |
साम्राज्यसंपदीशायै तस्यै देव्यै नमो नमः || 10 ||

वेदा निःश्वसितं यस्या वीक्षितं भूतपंचकं |
स्मितं चराचरं विश्वं तस्यै देव्यै नमो नमः || 11 ||

सहस्रशीर्षा भोगींद्रो धरित्रीं तु यदाज्ञया |
धत्ते सर्वजनाधारां तस्यै देव्यै नमो नमः || 12 ||

ज्वलत्यग्निस्तपत्यर्को वातो वाति यदाज्ञया |
ज्ञानशक्तिस्वरूपायै तस्यै देव्यै नमो नमः || 13 ||

पंचविंशतितत्त्वानि मायाकंचुकपंचकं |
यन्मयं मुनयः प्राहुस्तस्यै देव्यै नमो नमः || 14 ||

शिवशक्तीश्वराश्चैव शुद्धबोधः सदाशिवः |
यदुन्मेषविभेदाः स्युस्तस्यै देव्यै नमो नमः || 15 ||

गुरुर्मंत्रो देवता च तथा प्राणाश्च पंचधा |
या विराजति चिद्रूपा तस्यै देव्यै नमो नमः || 16 ||

सर्वात्मनामंतरात्मा परमानंदरूपिणी |
श्रीविद्येति स्मृता या तु तस्यै देव्यै नमो नमः || 17 ||

दर्शनानि च सर्वाणि यदंगानि विदुर्बुधाः |
तत्तन्नियमयूपायै तस्यै देव्यै नमो नमः || 18 ||

या भाति सर्वलोकेषु मणिमंत्रौषधात्मना |
तत्त्वोपदेशरूपायै तस्यै देव्यै नमो नमः || 19 ||

देशकालपदार्थात्मा यद्यद्वस्तु यथा तथा |
तत्तद्रूपेण या भाति तस्यै देव्यै नमो नमः || 20 ||

हे प्रतिभटाकारा कल्याणगुणशालिनी |
विश्वोत्तीर्णेति चाख्याता तस्यै देव्यै नमो नमः || 21 ||

इति स्तुत्वा महादेवीं धाता लोकपितामहः |
भूयो भूयो नमस्कृत्य सहसा शरणं गतः || 22 ||

इति श्रीब्रह्मांडमहापुराणे उत्तरभागे ललितोपाख्याने एकोनचत्वारिंशोऽध्याये ब्रह्मकृत श्री कामाक्षी स्तोत्रं |